

# 6 मानव-संसाधनम्

जनाः एव कस्यचिद् राष्ट्रस्य महत्तम-संसाधनानि भवन्ति । प्रकृतेः योगदानं तस्मिन् समये महत्त्वपूर्णं भवति यदा सा जनानां कृते उपयोगिनी भवति । जनाः स्व-आवश्यकतानुसारं स्वयोग्यताभिः प्रकृतेः संसाधनत्वेन परिवर्तनं कुर्वन्ति । एतेन प्रकारेण मानव-संसाधनम् एव अन्तिमं संसाधनम् अस्ति । स्वस्थाः शिक्षिताः एवं च अभिप्रेरिताः जनाः स्व-आवश्यकतानुरूपं संसाधनानां विकासं कुर्वन्ति ।

अन्य-संसाधनानि इव मानव-संसाधनं विश्वे समानरूपेण वितीर्णं न अस्ति । स्वीयः शैक्षिकस्तरः, आयुः, लिङ्गम् इति एतेषां दृष्ट्या जनाः परस्परं भिन्नाः सन्ति । तेषां सङ्ख्याः लक्षणानि च अपि परिवर्तन्ते ।

**किं भवन्तः जानन्ति ?**

भारतीय-सर्वकाराधीनः एकः मानव-संसाधनमन्त्रालयः अस्ति । 1985 तमे वर्षे मन्त्रालयस्य निर्माणं जनानां कौशलं वर्धयितुं कृतम् आसीत् । एतेन प्रदर्शितं भवति यत् जनाः देशस्य कृते अतीवमहत्त्वपूर्ण-संसाधनानि सन्ति ।



## जनसङ्ख्या-वितरणम्

भू-पृष्ठे येन प्रकारेण जनाः प्रसृताः सन्ति तत् जनसङ्ख्या-वितरणस्य प्रतिरूपम् इति कथ्यते । विश्वस्य जनसङ्ख्यायाः नवतिप्रतिशतात् अधिकः भागः भू-पृष्ठस्य प्रायशः दशप्रतिशतं भागे निवासं करोति । विश्वे जनसङ्ख्यायाः वितरणम् अत्यन्तम् असमानं अस्ति । कानिचन क्षेत्राणि सघनावासीयानि तथा च कानिचन क्षेत्राणि विरलावासीयानि सन्ति ।

दक्षिण-दक्षिण-पूर्वी-एशिया, यूरोपः तथा च उत्तर-पूर्वी-उत्तर-अमेरिका सघनावासीयानि क्षेत्राणि सन्ति । उच्चाक्षांशीय-क्षेत्रेषु उष्णकटिबन्धीय-मरुस्थलेषु उच्चपर्वतेषु तथा च विषुवतीय-वनानां क्षेत्रेषु बह्वल्पाः जनाः निवसन्ति ।

विषुवत-वृत्तस्य दक्षिणस्य अपेक्षया विषुवत-वृत्तस्य उत्तरे बह्वधिकाः जनाः निवसन्ति । विश्वस्य सकलजनसङ्ख्यायाः प्रायशः ¾ जनाः एशिया तथा च अफ्रीका इति द्वयोः महाद्वीपयोः निवसन्ति । विश्वस्य 60 प्रतिशतं जनाः केवलं दशसु देशेषु निवसन्ति । एतेषु सर्वेषु देशेषु दशकोट्यधिकाः जनाः निवसन्ति ।




**चित्रम् 6.1** महाद्वीपानुसारं विश्व-जनसङ्ख्या




**चित्रम् 6.2** विश्वस्य सघनजनसङ्ख्यायुक्ताः देशाः

विश्वस्य रूपरेखामानचित्रे एतान् देशान् चिह्नीकुर्वन्तु ।

स्रोतः : भारतस्य जनसंख्या, 2011, अस्थायिजनसंख्या-विवरणानि , भारत-शृङ्खला 1, पृष्ठं प्रथमम् 2011



**गतिविधिः**

6.1 चित्रस्य अध्ययनं कुर्वन्तु तथा च अन्वेषणं कुर्वन्तु ---

विश्वस्य समग्रजनसङ्ख्यासु कस्मिन् महाद्वीपे निम्नानुसारं जनसङ्ख्या अस्ति ---

(क) केवलं पञ्चप्रतिशतम्

(ख) केवलं त्रयोदशप्रतिशतम्

(ग) केवलम् एकप्रतिशतम्

(घ) केवलं द्वादशप्रतिशतम्



> **किं भवन्तः जानन्ति ?**
>
> भारतस्य जनसङ्ख्यायाः सामान्यं घनत्वं 382 जनाः प्रतिवर्गकिलोमीटरम् अस्ति।

## जनसङ्ख्यायाः घनत्वम्

पृथ्वी-पृष्ठस्य एकस्मिन् एकक-क्षेत्रे निवसतां जनानां सङ्ख्या "जन-घनत्वम्" इति कथ्यते। सामान्यतः एतद् प्रतिवर्ग-किलोमीटरद्वारा व्यक्तं क्रियते। सम्पूर्णविश्वस्य सामान्यं जनसङ्ख्या-घनत्वं 51 व्यक्तिः प्रतिवर्गकिलोमीटरम् अस्ति। सर्वाधिकं जनसङ्ख्या-घनत्वं दक्षिण-मध्य-एशियायाम् अस्ति। एतदनन्तरं क्रमशः पूर्वी-एशियायाम् एवं च दक्षिण-पूर्वी-एशियायाम् अस्ति।




## जनसङ्ख्या-वितरणस्य कृते प्रभावि-कारकाणि

> **गतिविधिः**
>
> 6.2 इति चित्रं पश्यन्तु एवं च अभिजानन्तु यत् एतेषु कति देशाः एशिया-महाद्वीपे सन्ति ? विश्व-मानचित्रे तान् विभिन्न-रङ्गैः चिह्नीकुर्वन्तु।

### भौगोलिक-कारकाणि

**स्थलाकृतिः** जनाः सदैव पर्वतानां प्रवणभागानां च अपेक्षया स्थलीय-क्षेत्रेषु निवासं कर्तुम् इच्छन्ति यतो हि एतानि क्षेत्राणि कृषेः विनिर्माणस्य तथा च सेवा-क्रियाणां कृते उपयुक्तानि भवन्ति। गङ्गायाः क्षेत्राणि विश्वस्य सर्वाधिकं सान्द्रावासीय-क्षेत्राणि सन्ति अपरञ्च एण्डीज् आल्पस् तथा च हिमालयः इति पर्वताः विरलावासीयाः सन्ति।

**जलवायुः** जनाः सामान्यरूपेण चरम-जलवायौ निवासं कर्तुं न इच्छन्ति यतो हि अयम् अत्यधिकोष्णः अथवा अत्यधिकशीतः भवति। एतादृशः जलवायुः सहारा-मरुस्थलं रूसस्य ध्रुवीयप्रदेशाः कनाडा तथा च अण्टार्कटिका इत्यत्र प्राप्यते।

**मृदा** उर्वरक-मृदाः कृषेः कृते उपयुक्त-भूमिं प्रददति। भारते गङ्गा तथा च ब्रह्मपुत्र चीने ह्वाङ्ग-ही चाङ्ग-जियाङ्गनदी तथा च मिश्रे नील-नदी इति नदीनाम् उर्वरक-क्षेत्राणि सान्द्रावासीयानि सन्ति।

**जलम्** जनाः तेभ्यः क्षेत्रेभ्यः निवासार्थं प्राथमिकतां प्रददति येषु क्षेत्रेषु अलवणीय-जलं सारल्येन उपलब्धं भवति। विश्वस्य नद्यः उपत्यकाः च सान्द्रावासीय-क्षेत्राणि सन्ति अपरञ्च मरुस्थलानि विरल-जनसङ्ख्यावन्ति क्षेत्राणि सन्ति।

**खनिजम्** खनिज-निक्षेपयुक्तानि क्षेत्राणि सान्द्रावासीय-क्षेत्राणि सन्ति। दक्षिण-अफ्रीकायाः हीरकस्य खनिभिः तथा च मध्य-पूर्वस्मिन् तैलस्य अन्वेषणेन जनाः एतेषु क्षेत्रेषु निवासार्थं प्रेरिताः कृताः सन्ति।



### सामाजिक-सांस्कृतिक-आर्थिक-कारकाणि

**आर्थिक-कारकाणि** औद्योगिक-क्षेत्राणि आजीविकायाः कृते अवसरान् प्रददति । जनाः अधिकसङ्ख्यायाम् एतानि क्षेत्राणि प्रति आकर्षिताः भवन्ति । जापाने ओसाका तथा च भारते मुम्बई द्वे सान्द्रावासीये क्षेत्रे स्तः ।

**सांस्कृतिक-कारकाणि** धार्मिक-सांस्कृतिकमहत्तायुक्तानि स्थानानि प्रति जनाः आकर्षिताः भवन्ति । वाराणासी येरूसलं तथा च वेटिकन-सिटी अस्य उदाहरणानि सन्ति ।

**सामाजिक-कारकाणि** सुन्दरावासः शिक्षा तथा च स्वास्थ्यम् इति सौविध्यैः युक्तानि क्षेत्राणि अत्यधिकानि सान्द्रावासीय-क्षेत्राणि सन्ति यथा पुणे ।

**शब्दावली**

जीवन-प्रत्याशा
एषा तेषां वर्षाणां सङ्ख्या अस्ति यस्यां सामान्य-व्यक्तेः जीवनस्य आशा कर्तुं शक्यते ।

### जनसङ्ख्या-परिवर्तनम्

जनसङ्ख्या-परिवर्तनस्य अभिप्रायः एकस्मिन् निश्चितावधौ जनानां सङ्ख्यायां परिवर्तनेन अस्ति । विश्वस्य जनसङ्ख्या स्थिरा न अस्ति । इयम् अनेकगुणितं वर्धिता अस्ति यथा 6.3 चित्रे दर्शितम् अस्ति । किमर्थम् ? एतद् वस्तुतः जन्म-मरणयोः सङ्ख्यायां परिवर्तनकारणात् अभवत् । मानवेतिहासस्य दीर्घावधौ 1800 ख्रीस्ताब्दं यावत् विश्वस्य जनसङ्ख्या शनैः शनैः वर्धिता अस्ति । विशालसङ्ख्यायां शिशवः जायन्ते स्म परन्तु शीघ्रमेव ते मृत्युम् अपि प्राप्नुवन्ति स्म । एतद् अनेन कारणेन आसीत् तत्र उचितानि स्वास्थ्य-सौविध्यानि न आसन् । सर्वेषां जनानां कृते पर्याप्त-भोजनम् उपलब्धं न आसीत् । कृषकाः सर्वेषां जनानां भोजनस्य आवश्यकताः पूरयितुं पर्याप्तोत्पादने असक्षमाः आसन् । परिणामस्वरूपं जनसङ्ख्यायां वृद्धिः बहुन्यूना आसीत् ।

1804 तमे ख्रीस्ताब्दे विश्वस्य जनसङ्ख्या एकम् अर्बुदम् अभवत् । 150 वर्षानन्तरं 1959 तमे वर्षे विश्वस्य जनसङ्ख्या त्र्यर्बुदम् अभवत्। एतत् प्रायः जनसङ्ख्या-विस्फोटः कथ्यते । 1999 तमे वर्षे त्रिंशद्वर्षाणाम् अवधौ जनसङ्ख्या द्विगुणीभूय षडर्बुदम् अभवत्। एतस्याः वृद्धेः मुख्यं कारणं खाद्यापूर्तिः तथा च औषधम् इति कारणात् मृत्यु-परिमाणे न्यूनता अस्ति । अपरञ्च जन्म-परिमाणम् अधुना अपि अधिकम् अस्ति ।

जन्मानि साधारणतः जन्म-परिमाणद्वारा आकल्यन्ते । जन्म परिमाणम् अर्थात् प्रतिसहस्रजनं जीवित-जन्मनां सङ्ख्यया मीयते । मृत्यु-परिमाणं प्रतिसहस्रजनं मृतकानां सङ्ख्यया मीयते । कस्मिंश्चित् विशेष-क्षेत्रे जनानां गमनागमनं प्रवासः कथ्यते ।

जन्म मृत्युः च जनसङ्ख्या-परिवर्तनस्य प्राकृतिकं कारणम् अस्ति । कस्यचिद् देशस्य जन्म-परिमाणं तथा च मृत्यु-परिमाणम् अन्तरा विद्यमानम् अन्तरं प्राकृतिक-वृद्धि-परिमाणं इति कथ्यते । विश्वे जनसङ्ख्या-वृद्धेः मुख्यं कारणं प्राकृतिक-वृद्धि-परिमाणस्य त्वरया वर्धनम् अस्ति ।




**चित्रम् 6.3** विश्व-जनसङ्ख्या-वृद्धिः




मृत्यु-अर्घस्य अपेक्षया जन्मार्घः अधिकः

जन्म-मरणपरिमाणयोः साम्यम् – जनसङ्ख्या समाना वर्तते।

जन्मपरिमाणतः मृत्यु-परिमाणस्य आधिक्यम्– जनसङ्ख्यायां न्यूनता।

**चित्रम् 6.4** जनसङ्ख्या-सन्तोलनम्



**शब्दावली**

**आप्रवासः**

यदा व्यक्तिः नवीन-देशं गच्छति।

**उत्प्रवासः**

यदा व्यक्तिः एकं देशं त्यजति।

प्रवासः एकम् अन्यत् कारणम् अस्ति येन जनसङ्ख्यायाः आकारे परिवर्तनं भवति। जनाः एकस्मिन् देशे अथवा देशानां मध्ये एकस्मात् स्थानात् अपरं स्थानं गन्तुं शक्नुवन्ति । ये देशं परित्यजन्ति ते जनाः उत्प्रवासि-जनाः भवन्ति । ये देशम् आगच्छन्ति ते आप्रवासि-जनाः भवन्ति।

संयुक्तराज्य-अमेरिका तथा च आस्ट्रेलिया देशयोः अन्तःप्रवासद्वारा अथवा आप्रवासद्वारा सङ्ख्या वर्धिता अस्ति । सूडानदेशः एकम् एतादृशम् उदाहरणम् अस्ति यस्मिन् उत्प्रवासस्य कारणात् जनसङ्ख्यायां न्यूनतायाः अनुभवः कृतः अस्ति । जनाः समुचित आर्थिकावसराणाम् अन्वेषणार्थम् अल्पविकसितराष्ट्रेभ्यः अधिकविकसितराष्ट्राणि प्रयान्ति इति अन्ताराष्ट्रिय-प्रवासस्य सामान्या प्रवृत्तिः अस्ति। देशेषु विशालसङ्ख्यायां जनाः वृत्ति-शिक्षा-स्वास्थ्यादीनां सौविध्यानां प्राप्तये ग्रामीण-क्षेत्रेभ्यः नगरीय-क्षेत्राणि प्रति गच्छन्ति।

## जनसङ्ख्या-परिवर्तन-प्रतिरूपाणि-

जनसङ्ख्या-वृद्धि-परिमाणं विश्वे पृथक् पृथक् वर्तते (चित्रम् 6.5)। यद्यपि विश्वस्य समग्र-जनसङ्ख्या त्वरया वर्धमाना अस्ति तथापि सर्वेषु देशेषु इयं वृद्धिः न अनुभूयमाना अस्ति। केषुचित् देशेषु यथा केन्यादेशे जनसङ्ख्या-वृद्धि-परिमाणम् उच्चम् अस्ति। देशेषु जन्मपरिमाणं मृत्यु-परिमाणं च उभे उच्चे स्तः । सद्य एव स्वास्थ्य-सेवासु संस्करणेन सह मृत्यु-परिमाणं न्यूनं जातम् अस्ति। परन्तु जन्म-परिमाणम् अधुना अपि अधिकम् अस्ति। येन वृद्धि-परिमाणं वर्धमानम् अस्ति।

अन्येषु देशेषु यथा संयुक्तराज्ये निम्नजन्ममृत्यु -अर्घयोः कारणेन जनसङ्ख्या-वृद्धिः मन्दं भवति।






**चित्रम् 6.5** विश्वे जनसङ्ख्या-वृद्धेः पृथक् पृथक् परिमाणम्

## जनसङ्ख्या-सङ्घटनम्

कस्यापि देशस्य जनसङ्ख्या कियती अपि अधिका भवतु नाम तस्याः तस्य देशस्य आर्थिक-विकासस्य स्तरेण कश्चिद् अपि भेदः न जायते। उदाहरणार्थम् – जापानदेशः तथा च बाङ्ग्लादेशः अतिसान्द्रावासीयौ देशौ स्तः। परन्तु जापानदेशः बाङ्ग्लादेशात् आर्थिकरूपेण अधिकः विकसितः अस्ति। एकसंसाधनरूपेण जनानां भूमिकाम् अवगन्तुं तेषां गुणानां विषये ज्ञानम् आवश्यकं अस्ति। आयुः लिङ्गं साक्षरता प्रस्तरः स्वास्थ्य-दशाः उपजीविका तथा च आयस्य प्रस्तरः इति एतेषु जनाः परस्परं भिन्नाः भवन्ति। जनानाम् एतासां विशेषतानां विषये ज्ञानम् आवश्यकम् अस्ति। जनसङ्ख्या-सङ्घटनं जनसङ्ख्यायाः संरचनां दर्शयति।




चिन्तयन्तु --- प्रत्येकं व्यक्तिः समाजस्य कृते एकं सम्भाव्य-संसाधनम् अस्ति। मानव-संसाधनरूपेण भवतां किं योगदानं भविष्यति ?



जनसङ्ख्या-सङ्घटनम् अस्माकम् एतस्मिन् विषये साहाय्यं करोति यत् कति पुरुषाः सन्ति कति महिलाः सन्ति ते कस्मिन् आयुर्वर्गे सन्ति कियन्तः शिक्षिताः सन्ति कं व्यवसायं कुर्वन्ति तेषाम् आयस्तरः कः अस्ति तथा च स्वास्थ्य-सेवाः कीदृश्यः सन्ति ? कस्यचिद् देशस्य जनसङ्ख्या-सङ्घटनस्य अध्ययनं कर्तुम् एकः रुचिकरविधिः "जनसङ्ख्या-पिरामिड्" इति अस्ति। एषः आयुर्लिङ्ग-सूच्यग्रस्तम्भः इति अपि कथ्यते।

एकं जनसङ्ख्या-सूच्यग्रस्तम्भः दर्शयति यत्- - - -

- समग्र-जनसङ्ख्या विभिन्नेषु आयुर्वर्गेषु विभाजिता अस्ति, उदाहरणार्थम् 5 तः 9 वर्षीयः, 10 तः 14 वर्षीयः
- समग्रजनसङ्ख्यायाः प्रतिशतम् एतेषु वर्गेषु प्रत्येकस्मिन् वर्गे पुरुषाः महिलाः च उपविभाजिताः सन्ति।

जनसङ्ख्या-सूच्यग्रस्तम्भस्य आकारः तस्मिन् विशिष्ट-देशे निवसतां जनानां कथां वदति। बालकानां सङ्ख्या (पञ्चदशवर्षेभ्यः न्यूना ) अधोभागे दर्शिता अस्ति अपि च एषा जन्मस्तरं दर्शयति। उपरितनः आकारः वृद्धजनानां (पञ्चषष्टिवर्षाधिकानाम्) तथा च मृतकानां सङ्ख्यां दर्शयति।




**चित्रम् 6.6** एकं जनसङ्ख्या-सूच्यग्रस्तम्भः












जनसङ्ख्या-पिरामिड् एकस्मिन् देशे आश्रित-जनानां सङ्ख्याम् अपि वदति। युवाश्रितजनाः (पञ्चदशवर्षेभ्यः न्यूनायुष्मन्तः) तथा च वृद्धाश्रितजनाः (पञ्चषष्टिवर्षेभ्यः अधिकायुष्मन्तः) आश्रितायु-जनसङ्ख्यायाः अन्तर्गताः भवन्ति। कार्यरतायुर्वर्गस्य (15 तः65 यावत्) जनाः आर्थिकरूपेण सक्रिय-वर्गे स्थापिताः सन्ति।

कस्यचिद् देशस्य जनसङ्ख्या-पिरामिड् इति यस्मिन् जन्म-परिमाणं तथा च मृत्युपरिमाणम् उभे एव उच्चे स्तः आधारे विस्तृतः अस्ति तथा च उपरिष्टात् तीव्रतया सङ्कुचितः भवति । एवम् एतदर्थमस्ति यत् बहवः शिशवः जन्म प्राप्नुवन्ति परन्तु तेषु अधिकानां मृत्युः शैशवकाले एव भवति तथा च केचन एव वयस्काः भवन्ति। अतः एव तत्र वृद्धाः बहुन्यूनाः सन्ति। अस्याः स्थितेः प्रदर्शनं केन्यायाः सूच्यग्रस्तम्भ-द्वारा कृतमस्ति (चित्रम् ६.७)।



**चित्रम् 6.7** केन्यादेशस्य पिरामिड्



**चित्रम् 6.8** भारतस्य पिरामिड्

येषु देशेषु मृत्युपरिमाणं (विशेषरूपेण लघुतमेषु बालकेषु) न्यूनं जायमानम् अस्ति, युववयवर्गस्य सूच्यग्रस्तम्भः विस्तृतं अस्ति यतो हि शिशवः प्रौढावस्था पर्यन्तं जीवन्ति । एतत् भारतस्य पिरामिडमध्ये दृष्टिगोचरं भवति । (चित्रम् ६.८)। एतादृश्यां जनसङ्ख्यायां युवानः सापेक्षतः अधिकाः सन्ति एतस्य अर्थः दृढः अस्ति।

न्यूनजन्म-परिमाणयुक्तेषु जापानप्रभृतिषु देशेषु आधारे सूच्यग्रस्तम्भः सङ्कुचितः अस्ति (चित्रम् ६.९) । व्याकलित-मृत्यु-परिमाणस्य कारणेन अधिकाः जनाः वार्धक्यं प्राप्नुवन्ति।

कुशलिनः, उत्साहिनः, आशावादिनः तथा च सकारात्मक-चिन्तकाः युवानः कस्यचित् राष्ट्रस्य भविष्याः भवन्ति। वयं भारतवासिनः भाग्यशालिनः स्मः यत् अस्माकं पार्श्वे एतादृशं संसाधनं अस्ति। ते युवानः निश्चयेन सुशिक्षणीयाः तथा च तेभ्यः अवसराः प्रदातव्याः येन ते योग्याः, उत्पादकाः, कुशलाः भवितुं शक्नुयुः।



**चित्रम् 6.9** जापानस्य सूच्यग्रस्तम्भः



## अभ्यासः

### 1. निम्न-लिखितप्रश्नानाम् उत्तराणि ददतु ---

(i) जनाः एकसंसाधनरूपेण किमर्थम् परिगणिताः ?

(ii) विश्वे जनसङ्ख्यायाः असमानवितरणस्य कानि कारणानि सन्ति ?

(iii) विश्वस्य जनसङ्ख्या अत्यन्तं तीव्रगत्या वर्धमाना अस्ति। किमर्थम् ?

(iv) जनसङ्ख्या-परिवर्तन-प्रभाविनोः कयोश्चित् द्वयोः कारकयोः भूमिकायाः वर्णनं कुर्वन्तु।

(v) जनसङ्ख्या-संघटनेन किं तात्पर्यम् अस्ति ?

(vi) जनसङ्ख्या-सूच्यग्रस्तम्भाः नाम किम् ? एतानि कस्यचित् देशस्य जनसङ्ख्यावगमने कथं साहाय्यं कुर्वन्ति ?

### 2. समीचीनम् उत्तरं चिह्नीकुर्वन्तु ---

(i) जनसङ्ख्यावितरण-शब्देन किं तात्पर्यम् अस्ति ?

(क) कस्मिंश्चित् विशिष्टे क्षेत्रे समयेन सह जनसङ्ख्यायां केन प्रकारेण परिवर्तनं भवति।

(ख) कस्मिंश्चित् विशिष्टे क्षेत्रे जन्मवतां जनानां सङ्ख्यायाः सन्दर्भे म्रियमाणानां जनानां सङ्ख्या।

(ग) कस्मिंश्चित् दत्ते क्षेत्रे जनाः कस्मिन् रूपे वितरिताः सन्ति।

(ii) तानि त्रीणि कानि कारकाणि सन्ति यैः जनसङ्ख्यायां परिवर्तनं जायते ?

(क) जन्म मृत्युः तथा च विवाहः

(ख) जन्म मृत्युः तथा च प्रवासः

(ग) जन्म मृत्युः तथा च जीवनप्रत्याशा

(iii) १९९९ तमे वर्षे विश्वस्य जनसङ्ख्या अभवत्-

(क) १ अर्बुदम्

(ख) ३ अर्बुदम्

(ग) ६ अर्बुदम्

(iv) जनसङ्ख्या-पिरामिड् इति किम् अस्ति ?

(क) जनसङ्ख्यायाः आयुर्लिङ्ग-सङ्घटनानाम् आलेखीयं निरूपणम्।

(ख) यदा कस्यचित् क्षेत्रस्य जनसघनत्वम् एतावत् वर्धितं भवति यत् जनाः उन्नतभवनेषु निवसन्ति।

(ग) बृहन्नगरीय-क्षेत्रेषु जनसङ्ख्यावितरणस्य प्रतिरूपम्।

3. **अधोदत्तानां शब्दानाम् उपयोगं कृत्वा वाक्यानि पूरयन्तु ---**

विरलः, अनुकूलम्, वलियुक्तम्, कृत्रिमम्, उर्वरा, प्राकृतिकम् ,चरमम्, सघनम् ।

यदा जनाः किमपि क्षेत्रं प्रति आकर्षिताः भवन्ति तदा इदं --------------उषितं भवति। एतस्य कृते प्रभाविकारकाणाम् अन्तर्गतं ---------- जलवायुः ------- संसाधनानाम् आपूर्तिः तथा च --------- भूमिः आगच्छति।

4. **गतिविधिः**

यस्मिन् समाजे १५ वर्षेभ्यः न्यूनायुष्मन्तः बहवः जनाः सन्ति तथा च १५ वर्षेभ्यः न्यूनायुष्मन्तः बहुन्यूनाः जनाः सन्ति तस्य समाजस्य विशेषतानां वर्णनं कुर्वन्तु-

सङ्केतम्:- विद्यालयस्य आवश्यकताः, पूर्वसेवावृत्ति-योजना (पेंशन-स्कीम), शिक्षकः, क्रीडनकाः, चक्रयुक्ता आसन्दिका, श्रमापूर्तिः, चिकित्सालयः ।

## अधिकसूचनायै अन्तर्जाले कानिचन महत्त्वपूर्णानि स्रोतानि

www.ndmindia.nic.in
www.environmentdefense.org
www.freefoto.com
www.worldgame.org/worldmeters
www.cseindia.org
www.mnes.nic.in
www.undp.org/popin

